# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा - अक्टूबर - 2019

| | | |
|---|---|---|
| **कक्षा-आचार्य(SEM-१) (New)** | **प्रश्नपत्रम् – 5** | गुणाः –70 |
| विषयः – साहित्यम् (ऐच्छिकम्) | **कोड –C.E.4.1.1** | समयः- 8 तः 11 पर्यन्तम् |
| दिनाङ्कः –14/10/2019 | सन्दर्भग्रन्थः – उत्तररामचरितम् (१-३) | |

**प्रथमान्वितिः (Unit 1)** गुणाः

**प्रश्न १ अधोलिखितयोः एकस्य ससन्दर्भं व्याख्या कार्या।** ५

१ देव्या अपि हि वैदेह्याः साऽपवादो यतो जनः।
रक्षोगृहस्थितिर्मूलमग्निशुद्धौ त्वनिश्चयः॥

२ लौकिकानां हि साधूनामर्थं वागनुवर्तते।
ऋषीणां पुनराद्यानां वाचमर्थोऽनुधावति॥

**प्रश्न २ निम्नलिखितयोः कस्याप्येकस्य प्रश्नस्योत्तरं विवर्णयत।** १०

१ भवभूतेः परिचयो देयः।

२ उत्तररामचरितस्य प्रकृतिचित्रणं विधीयताम्।

**द्वितीयान्वितिः (Unit 2)**

**प्रश्न ३ निम्नलिखितयोः कस्यचिदेकस्य ससन्दर्भं व्याख्यां कुरुत।** ५

१ विश्वम्भराभगवती भवतीमसूत राजा प्रजापतिसमो जनकः पिता ते।
तेषां वधूस्त्वमसि नन्दिनि पार्थिवानां येषां कुलेषु सविता च गुरुर्वयं च॥

२ जीवत्सु तातपादेषु नूतने दारसङ्ग्रहे।
मातृभिश्चिन्त्यमानानां ते हि नो दिवसा गताः॥

**प्रश्न ४ निम्नलिखितयोः कस्याप्येकस्य प्रश्नस्योत्तरं विवर्णयत।** १०

१ प्रथमाङ्कस्य कथासारं समासेन विवेचयन्तु।

२ सीतापरित्यागावसरे रामस्य मनोवेदनां वर्णयत ।

## तृतीयान्वितिः (Unit 3)

**प्रश्न ५ अधोलिखितयोः एकं ससन्दर्भं व्याख्यायत ।** ५

१ यत्रानन्दाश्च मोदाश्च यत्र पुण्याश्च सम्पदः ।
वैराजा नाम ते लोकास्तैजसा सन्तु ते शिवाः ॥

२ पुरा यत्र स्रोतः पुलिनमधुना तत्र सरितां विपर्यासं यातो
घनविरलभावं क्षितिरुहाम् ।
बहोर्दृष्टं कालादपरमिवमन्ये वनमिदं निवेशः शैलानां तदिदमिति बुद्धिं
द्रढयति ॥

**प्रश्न ६ निम्नलिखितयोः कस्याप्येकस्य प्रश्नस्योत्तरं विवर्णयत ।** १०

१ द्वितीयाङ्कस्य कथासारं समासेन वर्णयन्तु ।

२ शम्बूकवृत्तान्तं ग्रन्थानुसारं लिखत ।

## चतुर्थान्वितिः (Unit 4)

**प्रश्न ७ अधोलिखिताभ्यां एकस्य ससन्दर्भं व्याख्यां कुरुत ।** ५

१ अन्तःकरणतत्त्वस्य दम्पत्योः स्नेहसंश्रयात् ।
आनन्दग्रन्थिरेकोऽयमपत्यमिति बध्यते ॥

२ पूरोत्पीडे तटाकस्य परीवाहः प्रतिक्रिया ।
शोकक्षोभे च हृदयं च प्रलापैरेव धार्यते ॥

**प्रश्न ८ निम्नलिखितयोः कस्याप्येकस्य प्रश्नस्योत्तरं विवर्णयत ।** १०

१ तृतीयाङ्कस्य कथासारं संक्षेपेण वर्णयत ।

२ वनदेवता वासन्त्याः संवादतत्त्वानि तृतीयाङ्कानुसारेण वर्णनं कुरुत ।

**प्रश्न ९ दशप्रश्नानामतिलघूत्तराणि लिखत ।** १०

१ भवभूतेः पितुर्नाम किम् ?

२ भवभूतिः कस्मिन् गोत्रे समुत्पन्नः ?

३ रामचन्द्रः कीदृशो नायकोऽस्ति ?

४ उत्तररामचरिते प्रधानरसः कोऽस्ति ?
५ जानकी कीदृशी नायिकाऽस्ति ?
६ प्रथमाङ्के कः प्रधानः कार्यः ?
७ द्वितीयाङ्कस्य नाम किम् ?
८ तृतीयाङ्कस्य नाम किम् ?
९ लोपामुद्रा कस्य ऋषेः पत्नी वर्तते ?
१० मुरला काऽस्ति ?
११ कुशिकनन्दनः कः ?
१२ रामस्य मातरः कुत्र गताः ?
१३ दशरथस्य कन्यायाः नाम किम् ?
१४ विभाण्डकस्सुतः कः ?
१५ दुर्मुखः कः ?